**संस्कृतम्**

**कक्षा– नवमी**

अपठितपद्यांशाधारितप्रश्नाः

1. प्रीणाति यः सुचरितैः पितरं स पुत्रो
   यद् भर्तुरेव हितमिच्छति तत् कलत्रम् ।
   तन्मित्रमापदि सुखे च समक्रियं यत्
   एतत् त्रयं जगति पुण्यकृतो लभन्ते ।।

   अ. एकदेन उत्तरत।

   क. यद् भर्तुः हितमिच्छति तत् किम् अस्ति ?

   ख. पुत्रः पितरं कैः प्रीणाति?

   ब. पूर्णवाक्येन उत्तरत ।

   क. यत् आपदि सुखे च समानं भवति तत् किं कथ्यते?

   ख. कः पुत्रः?(मूल्यपरकप्रश्नः)

   स. निर्देशानुसारमुत्तरत ।

   क. 'लभन्ते' इति क्रियापदस्य किं कर्तृपदम् ?( जगत्/पुण्यकृतः/पुत्राः)

   ख. 'पत्नी' इत्यस्य कृते किं पर्यायपदं श्लोके प्रयुक्तम् ?(मित्रम्/कलत्रम्/भर्ता)

   ग. 'पुत्रः'इत्यस्य कृते किं विशेषणपदं श्लोके प्रयुक्तम् ?(सः/एषः/ एतत्)

   घ. 'दुःखे' इत्यस्य कृते किं विपरीतार्थकपदं प्रयुक्तम् ?( सुखे/आपदि/ हितम्)

2. नमन्ति फलिनः वृक्षाः नमन्ति गुणिनः जनाः
   शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन ।।

   क. एकपदेन उत्तरत।

   कीदृशाः वृक्षाः नमन्ति ?

   गुणिनः जनाः किं कुर्वन्ति ?

ख. पूर्णवाक्येन उत्तरत।

के के च कदापि न नमन्ति ?

ग. निर्देशानुसारमुत्तरत।

1. 'नमन्ति'पदस्य कृते किं कर्तृपदं श्लोके प्रयुक्तम् ?
2. श्लोके 'जनाः' इति पदस्य कृते किं विशेषणपदं प्रयुक्तम्?

3. अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्।।

अ. एकदेन उत्तरत।

क. परोपकारेण नरः किं प्राप्नोति ?

ख. पुराणानि केन संगृहीतानि ?

ब. पूर्णवाक्येन उत्तरत ।

क. अष्टादशपुराणेषु व्यासस्य वचनद्वयम् किं वर्तते ?

(मूल्यपरकप्रश्नः)

स. निर्देशानुसारमुत्तरत ।

क. 'कथनम्' इत्यर्थे कः शब्दः श्लोके प्रयुक्तः ? (मित्रम्/कलत्रम्/भर्ता)

ख. 'परोपकारः' इत्यस्य किं विलोमपदं प्रयुक्तम् ? ( पुराणम्/ पुण्यम्/ परपीडनम्)

4. यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः कांचनमाश्रयन्ति।।

अ. एकदेन उत्तरत।

क. सर्वे गुणाः किम् आश्रयन्ति ?

ब. पूर्णवाक्येन उत्तरत ।

क. यस्य पार्श्वे धनं वर्तते तस्य काः विशेषताः श्लोके वर्णिताः।

(मूल्यपरकप्रश्नः)

स. निर्देशानुसारमुत्तरत ।

क. आश्रयन्ति इति पदस्य कर्तृपदम् किम् ?(गुणाः/कलत्रम्/भर्ता)

ख. 'मूर्खः' इत्यस्य किं विलोमपदं प्रयुक्तम् ? (पण्डितः/ वक्ता/ गुणज्ञः)

5 चलं वित्तं चलं चित्तं चले जीवितयौवने।

चलाचलमिदं सर्वं कीर्तिर्यस्य स जीवति।

अ. एकदेन उत्तरत।

वित्तं कीदृशं भवति?

ब. पूर्णवाक्येन उत्तरत

कः जीवति?

स. निर्देशानुसारमुत्तरत ।

क. चंचलम् इति पदस्य पर्यायपदं लिखन्तु।

ख. श्लोके धनम् इत्यर्थे किं पदम् प्रयुक्तम् ?

6. विद्या ददाति विनयम् विनयाद्याति पात्रताम्।

पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततः सुखम्।।

अ. एकदेन उत्तरत।

क. पात्रता कस्मात् आयाति ?

ख. मनुष्यः पात्रत्वात् किम् आप्नोति ?

ब. पूर्णवाक्येन उत्तरत ।

क. विनयस्य कारणं किं वर्तते?

(मूल्यपरकप्रश्नः)

स. निर्देशानुसारमुत्तरत ।

क. 'ददाति' इति क्रियापदस्य किं कर्तृपदं श्लोके प्रयुक्तम्?

ख. 'अधर्मः' इत्यस्य किं विलोमपदं प्रयुक्तम् ?

——0——